## उपशास्त्री II

संस्कृत सामान्यम् ।

अनिवार्यपत्रम् ।   धातुरूपाणि ।

√आस् = (उपविशन् अर्थे, बैठना)/ आत्मनेपदी ।

| लकार: | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| लट् | प्रथम पु० | आस्ते | आसाते | आसते |
| | मध्यम पु० | आस्से | आसाथे | आद्ध्वे |
| | उत्तम पु० | आसे | आस्वहे | आस्महे |
| लोट् | प्र० पु० | आस्ताम् | आसाताम् | आसन्ताम् |
| | म० पु० | आस्व | आसाथाम् | आद्ध्वम् |
| | उ० पु० | आसै | आसावहै | आसामहै |
| लङ् | प्र० पु० | आस्त | आसाताम् | आसत |
| | म० पु० | आस्था: | आसाथाम् | आद्ध्वम् |
| | उ० पु० | आसि | आस्वहि | आस्महि |
| विधिलिङ् | प्र० पु० | आसीत | आसीयाताम् | आसीरन् |
| | म० पु० | आसीथा: | आसीयाथाम् | आसीध्वम् |
| | उ० पु० | आसीय | आसीवहि | आसीमहि |
| लृट् | प्र० पु० | आसिष्यते | आसिष्येते | आसिष्यन्ते |
| | म० पु० | आसिष्यसे | आसिष्येथे | आसिष्यध्वे |
| | उ० पु० | आसिष्ये | आसिष्यावहे | आसिष्यामहे |


[signature] 10-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य

रा०उ० सं० महावि० सुखसेना, पूर्णियाँ

16-10-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । शब्दरूपम्

"वारि" (इकारान्त, क्लीवलिङ्ग / नपुंसकलिंग)

| विभक्ति: - | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा - | वारि | वारिणी | वारीणि |
| द्वितीया - | " | " | " |
| तृतीया - | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी - | वारिणे | " | वारिभ्यः |
| पञ्चमी - | वारिणः | " | " |
| षष्ठी - | " | वारिणोः | वारिणाम् |
| सप्तमी - | वारिणि | " | वारिषु |
| सम्बोधन - | हे वारे, वारि ! | हे वारिणी ! | हे वारीणि ! |

—x—

"दधि" (इकारान्त, क्लीवलिङ्ग / नपुंसकलिङ्ग)

| | | | |
|---|---|---|---|
| प्रथमा - | दधि | दधिनी | दधीनि |
| द्वितीया - | " | " | " |
| तृतीया - | दध्ना | दधिभ्याम् | दधिभिः |
| चतुर्थी - | दध्ने | " | दधिभ्यः |
| पञ्चमी - | दध्नः | " | " |
| षष्ठी - | " | दध्नोः | दध्नाम् |
| सप्तमी - | दध्नि, दधिनि | " | दधिषु |
| सम्बोधन - | हे दधे, दधि ! | हे दधिनी ! | हे दधीनि ! |

—x—

16-10-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम् ।
व्याकरणछात्रहेतवे ।

शास्त्री II

16-10-2020

रघुवंशम् ।

श्लोकव्याख्या ।

" कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तः परिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ।। "

सन्दर्भः → प्रस्तुतमिदं पद्यं कविकुलगुरुकालिदासप्रणीतस्य 'रघुवंश' महाकाव्यस्येन्दुमतीस्वयंवरवर्णनप्रसङ्गात् षष्ठसर्गात् उद्धृतमस्ति ।

प्रसङ्गः → कविरत्र इन्दुमतीं दृष्ट्वा कस्यचिद् राज्ञः शृङ्गारचेष्टा-प्रकारमेव वर्णयति ।

भावार्थः → कोऽपि राजाकरे कमलमादाय तद् मण्डलाकारं भ्रामयित्वा इन्दुमतीमालोकितवान् ।

तात्पर्यः → राजकुमारीमिन्दुमतीं प्रति प्रदर्शितप्रेमरतां नृपतीनां विविध-शृङ्गारचेष्टाविशेषाः तरुपल्लवेव प्रेमाग्रदूतिकाः सदृशाः बभूवुरिति भावः ।

श्लोकान्वयः → कश्चित् कराभ्याम् उपगूढनालम् आलोलपत्राभिहतद्विरेफं रजोभिः अन्तः परिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार ।

शब्दार्थः व्याकरणञ्च → उपगूढनालम् → उपगूढं नालं यस्य तत् = धारितपद्मदण्डम् । आलोलपत्राभिहतद्विरेफम् → आलोलानि च तानि पत्राणि, तैः अभिहिताः द्विरेफाः येन तत् = चञ्चलपत्रताडित-मधुपं । रजोभिः = कुसुमपरागैः । परिवेषबन्धि = मण्डलाकारम् ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, स्वभावोक्तिरलङ्कारः, उपजातिवृतञ्च ।

16-10-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ